1

प्रश्नोपनिषद्भाष्यप्रारंभः ।

ई०प०भा०॥
॥२॥

श्रीगणेशायनमः॥ ईशावास्यमित्यादयोमंत्राःकर्मस्वविनियुक्ताःतेषामकर्मशेषस्यात्मनोया
थात्म्यप्रकाशकत्वात्॥ यथात्म्यंचात्मनःशुद्धत्वापापविद्धत्वैकत्वनित्यत्वाशरीरत्वस
र्वगतत्वादिवक्ष्यमाणंतच्चकर्मणाविरुध्यतइतियुक्तएवैषांकर्मस्वविनियोगः॥न ह्येवंल
क्षणमात्मनोयाथात्म्यमुत्पाद्यंविकार्यमाप्यंसंस्कार्यंचकर्तृभोक्तृरूपंवायेनकर्मशे
षतास्यात्॥सर्वासामुपनिषदामात्मयाथात्म्यनिरूपणेनैवउपक्षयात्गीतानांमो
क्षधर्माणांचैवंपरत्वात्॥तस्मादात्मनोऽनेकत्वकर्तृत्वभोक्तृत्वादिचाशुद्धत्वपापविद्धत्वादि
चोपादायलोकबुद्धिसिद्धंकर्माणिविहितानियोहिकर्मफलार्थीदृष्टेनब्रह्मवर्चसादिना
दृष्टेनस्वर्गादिनाचद्विजातिरहंनकाणकुब्जअनधिकारधर्मवानइत्यात्मानंमन्यते

श्रीराम०॥
१॥

ई०उ०भा०
२

धातक्लेदादिजमौपाधिकं दौर्गंध्यं तत्स्वरूपनिघर्षणेनाच्छाद्यते स्वेन पारमार्थिकगंधेन तद्वदे
व ह्यात्मन्यध्यस्तं स्वाभाविकं कर्तृभोक्तृत्वादिलक्षणं जगद्द्वैतरूपं जगत्यां पृथिव्यां जगत्यामि
त्युपलक्षणार्थत्वात्सर्वमेव नामरूपकर्माख्यं विकारजातं परमार्थसत्यात्मभावनया त्य
क्तं स्यात्. एवमीश्वरात्मभावनया युक्तस्य पुत्राद्येषणात्रयसंन्यास एवाधिकारो न कर्मसु तेन
त्यागेनेत्यर्थः न हि त्यक्तो मृतः पुत्रो वा भृत्यो वा आत्मसंबंधिताया अभावादात्मानं पालयत्य
तस्त्यागेनेत्ययमेवार्थः भुंजीथाः पालयेथाः एवं त्यक्तैषणस्त्वं मा गृधः गृधिमाकांक्षां
मा कार्षीर्धनविषयां कस्यस्विद्धनं कस्यचित्परस्य स्वस्य वा धनं मा कांक्षीरित्यर्थः स्विदित्य
नर्थको निपातः अथवा मा गृधः कस्मात् कस्यस्विद्धनमित्याक्षेपार्थः न कस्यचिद्धनमस्ति यद्गृ
ध्येतात्मैवेदं सर्वमितीश्वरभावनया सर्वं त्यक्तम् अत आत्मन एवेदं सर्वमात्मैव च सर्वमतो
मिथ्याविषयां गृधिं मा कार्षीरित्यर्थः १ एवमात्मविदः पुत्राद्येषणात्रयसंन्यासेनात्म श्रीराम

२

सोऽधिकारी येनैकर्म्यस्थिति सधिकारविशेषवत्तिनस्मादेते मंत्राः आत्मनो याथात्म्यप्रका
शनेऽनात्मविषये स्वाभाविकमज्ञानं निवर्त्तयन्तः शोकमोहादिसंसारविच्छित्तिसाध
नमात्मैकत्वादिविज्ञानमुत्पादयंतीत्येवमुक्ताधिकार्यभिधेयसंबंधप्रयोजना
न्मंत्रान्संक्षेपतो व्याख्यास्यामः ईशावास्यमिदं सर्वं यत्किंचिज्जगत्यां जगत्
तेन त्यक्तेन भुंजीथा मा गृधः कस्यस्विद्धनम् १ ईशावास्यमित्यादि ईशा ईष्टे इतीट् ते
न ईशा ईशिता परमेश्वरः परमात्मा सर्वस्य स हि सर्वमीष्टे सर्वजंतूनामात्मा सन् प्रत्य
गात्मतया तेन स्वेन रूपेणात्मनेशा वास्यमाच्छादनीयं किं इदं सर्वं यत्किंचि जगत्यां पृथि
व्यां जगत्तत्सर्वं स्वेनात्मनेशेन प्रत्यगात्मतयाऽहमेवेदं सर्वमिति परमार्थसत्यरूपे
णानृतमिदं सर्वं चराचरमाच्छादनीयं परमात्मना यथा चन्दनागर्वादेरुदकादिसंबं

ई०भा०

३

3

मा गृधः कस्यस्विद्धनमिति च न जीविते मरणे वा गर्धां कुर्वीत अरण्यमियादिति पदं ततो न पु
नरियादिति संन्यासशासनात् उभयोः फलभेदं च वक्ष्यति इमौ द्वावेव पन्थानावनुनिष्क्रान्ततरौ भव
तः क्रियापथश्चैव पुरस्तात्संन्यासश्चोत्तरेण निवृत्तिमार्गेण एषणात्रयस्य त्यागः तयोः संन्यासपथ एवातिरे
चयति न्यास एवात्यरेचयदिति तैत्तिरीयके द्वाविमावथ पन्थानौ यत्र वेदाः प्रतिष्ठिताः प्रवृ
त्तिलक्षणो धर्मो निवृत्तिश्च विभाषितः इत्यादि पुत्राय विचार्य निश्चितमुक्तं व्यासेन वेदा
चार्येण भगवता विभागं चानयोर्दर्शयिष्यामः २ असुर्या नाम ते लोका अन्धेन तमसा
वृतास्तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ३ अथेदानीमविद्वन्निन्दार्थोऽयं मन्त्र आर
भ्यते असुर्याः परमात्मभावमद्वयमपेक्ष्य देवादयोऽप्यसुरास्तेषां च स्वभूता लोका असुर्या नाम नामश
ब्दोऽनर्थको निपातः ते लोकाः कर्मफलानि लोक्यन्ते दृश्यन्ते भुज्यन्त इति जन्मानि अन्धेना
दर्शनात्मकेनाज्ञानेन तमसावृता आच्छादितास्तान्स्थावरान्तान्प्रेत्य त्यक्त्वेमं देहमभिगच्छन्ति

श्रीः

३

ज्ञाननिष्ठतया आत्मा रक्षितव्य इत्येष वेदार्थः ॥ २ ॥ कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥ २ ॥ अथेतरस्यानात्मज्ञतया आत्मग्रहणायाशक्तस्ये
दमुपदिशति मंत्रः कुर्वन्नेवेति कुर्वन्नेव निर्वर्तयन्नेवेह कर्माण्यग्निहोत्रादीनि जिजीविषेज्जीवि म.
छतं शतसंख्याकाः समाः संवत्सरान् तावद्धि पुरुषस्य परमायुर्निरूपितं तथा च प्राप्तानुवा
देन यज्जिजीविषेच्छतं वर्षाणि तत्कुर्वन्नेव कर्माणीत्येतद्विधीयते एवमेवंप्रकारेण त्वयि जिजी
विषति नरे नरमात्राभिमानिनि इत एतस्मात्कुर्वतो वर्तमानप्रकारादन्यथा प्रकारान्तरं नास्ति ये
न प्रकारेणाशुभं कर्म न लिप्यते कर्मणा न लिप्यत इत्यर्थः अतः शास्त्रविहितानि कर्माण्यग्नि
होत्रादीनि कुर्वन्नेव जिजीविषेत् कथं पुनरिदमवगम्यते पूर्वेण मन्त्रेण संन्यासिनो ज्ञाननिष्ठो
क्ता द्वितीयेन तदशक्तस्य कर्मनिष्ठेत्युच्यते ज्ञानकर्मणोर्विरोधं पर्वतवदकम्प्यं यथोक्तं न
स्मरसि किं इहाप्युक्तं यो हि जिजीविषेत्स कर्म कुर्वन् ईशावास्यमिदं सर्वं तेन त्यक्तेन भुंजीथाः

लोके प्रसिद्धं तस्मिन्मनसि ब्रह्मलोकादीन् द्रुतं गच्छति प्रथमं प्राप्त इवात्मचैतन्याभासो गृह्यते अतो म
नसो जवीय इत्याह नैनद्देवा द्योतनाद्देवाश्चक्षुरादीनीन्द्रियाणि एतत्प्रकृतमात्मतत्त्वं नाप्नुवन्न प्राप्नुवंतस्ते
भ्यो मनो जवीयो मनोव्यापारव्यवहितत्वादाभासमात्रमप्यात्मनो नैव देवानां विषयो भवति यस्माज्ज
वनान्मनसोपि पूर्वमर्षत् पूर्वमेव गतं व्योमवद्व्यापित्वात् सर्वव्यापि तदात्मतत्त्वं सर्वसंसारधर्मव
र्जितं स्वेन निरुपाधिकेन स्वरूपेणाविक्रियमेव सदुपाधिकृताः सर्वाः संसारविक्रिया अनुभवतीवा
विवेकिनां मूढानामनेकमिव च प्रतिदेहं प्रत्यवभासत इत्येतदाह तद्धावतो [illegible] गच्छतोऽन्या
नात्मविलक्षणान्मनोवागिन्द्रियप्रभृतीनत्येत्यतीत्य गच्छतीव इवार्थं स्वयमेव दर्शयति तिष्ठदि
ति स्वयमविक्रियमेव सदित्यर्थः तस्मिन्नात्मतत्त्वे सति नित्यचैतन्यस्वभावे मातरि[illegible] मातर्यं
तरिक्षे श्वयति गच्छतीति मातरिश्वा वायुः सर्वप्राणभृत् क्रियात्मको यदाश्रयाणि कार्यक
रणजातानि यस्मिन्नोतानि प्रोतानि च यत्सूत्रसंज्ञकं सर्वस्य जगतो विधारयितृ स मातरि
श्वापः कर्माणि प्राणिनां चेष्टालक्षणानि अग्न्यादित्यपर्जन्यादीनां ज्वलनदहनप्रकाशा

श्री [illegible]

यथाक्रमं यथायाथ्यतं ये के चात्महनः आत्मानं घ्नन्तीत्यात्महनः ते के [illegible] अविद्वांसः [illegible] तेनात्मनां [illegible] हिंसंति अ-
विद्यादोषेन विद्यमानस्यात्मनस्तिरस्करणात् विद्यमानस्यात्मनोऽपन्हा [illegible] दिसं वेद-
नादि तत्फलं [illegible] भूतं भवतीति प्राकृता अविद्वांसो जना आत्मघ्न उच्यन्ते तेन [illegible]
दोषसंसरंति यस्मात्तेनात्महनो अविद्वांसः संसरन्ति तद्विपर्ययेन विद्वांसो जना मुच्यन्ते [illegible]
२ अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन्पूर्वमर्षत् तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो
मातरिश्वा दधाति ४ तत्कीदृशमात्मतत्त्वमित्युच्यते अनेजत् [illegible] कंपने कंपनं [illegible]
प्रच्युतिस्तद्वर्जितं सर्वदैकरूपमित्यर्थः तच्चैकं सर्वभूतेषु मनसः संकल्पादिलक्षणाज्जवीयो जवत्तरं कथं
विरुद्धमुच्यते ध्रुवं निश्चलमिदं मनसो जवीय इति नैष दोषः निरुपाध्युपाधिमत्त्वोपपत्तेः तत्र निरु-
वे २ पाधिः स्वेन रूपेणोच्यते अनेजदेकमिति मनसोऽन्तःकरणस्य संकल्पविकल्पलक्षणस्योपाधेरनुव-
र्तमानात् देहस्थस्य मनसो ब्रह्मलोकादिदूरगमनं संकल्पेन क्षणमात्राद्भवतीत्यतो मनसो जविष्ठत्वं

मवस्यात्मानमेवात्यन्तविशुद्धं निरंतरं पश्यतो न घृणानिमित्तमर्थान्तरमस्तीति प्राप्तमेव ततो न विजुगुप्सत इति ६
यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः तत्र को मोहः कः शोक एकत्वमनुपश्यतः ७ इममेवार्थमन्योपि मंत्राह
यस्मिन्सर्वाणि भूतानि यस्मिन्काले यथोक्तात्मनि वा तान्येव भूतानि सर्वाणि परमार्थात्मदर्शनादात्मैवाभूदात्मैव
संवृत्तः परमार्थवस्तु विजानतस्तत्र तस्मिन्काले तत्रात्मनि वा को मोहः कः शोकः शोकश्च मोहश्च कामबीजमजान
तो भवति नत्वात्मैकत्वं विशुद्धं गगनोपमं पश्यतः को मोहः कः शोक इति शोकमोहयोरविद्याकार्ययोराक्षेपेणा
संभवदर्शनात् सकारणस्य संसारस्यात्यंतमेवोच्छेदः प्रदर्शितो भवति ७ स पर्यगाच्छुक्रमकायमव्रणमस्ना
विरं शुद्धमपापविद्धं कविर्मनीषी परिभूः स्वयंभूर्याथातथ्यतोऽर्थान्व्यदधाच्छाश्वतीभ्यः समाभ्यः ८ योय
मतीतैर्मंत्रैरुक्त आत्मा स स्वेन रूपेण किंलक्षण इत्याह अयं मंत्रः स पर्यगात्स यथोक्त आत्मा पर्यगात्परि समंतादगा
द्गतवानाकाशवद्व्यापीत्यर्थः शुक्रं शुद्धं ज्योतिष्मद्दीप्तिमानित्यर्थः अकायमशरीरं लिंगशरीरविवर्जितमि
त्यर्थः अव्रणमक्षतमस्नाविरं स्नावाः शिरा न विद्यंत इत्यस्नाविरं अव्रणमस्नाविरमित्याभ्यां स्थूलशरी
रप्रतिषेधः शुद्धं निर्मलं अपापविद्धं धर्माधर्मादिपापवर्जितं शुक्रमित्यादीनि वचांसि पुंलिंगत्वेन प
रिणेयानि स पर्यगादित्युपक्रम्य कविर्मनीषीत्यादिना पुंलिंगत्वेनोपसंहारात् कविः क्रान्तदर्शी सर्वदृक् नान्यो
तोस्ति द्रष्टा इत्यादिश्रुतेः मनीषी मनस ईषिता सर्वज्ञ ईश्वर इत्यर्थः परिभूः सर्वेषां पर्युपरि भवतीति प

मिवर्षणादिलक्षणानि दधाति विभजतइत्यर्थः धारयतीतिवा भीषास्माद्वातःपवतइत्यादिश्रुतिभ्यः सर्वाहि कार्यकर
णादिक्रियानित्यचैतन्यात्मस्वरूपे सर्वास्पदभूते सत्येवसंभवतीत्यर्थः ४ तदेजतितन्नैजतितद्दूरेतद्वंतिके तदंतरस्यसर्वस्य
तदुसर्वस्यास्यबाह्यतः ५ नमंत्राणांजामितास्तीतिपूर्वमंत्रोक्तमप्यर्थंपुनराह तदात्मतत्त्वंयत्प्रकृतंतदेजति
चलतितदेवचनैजतिनचलतिस्वतोऽचलमेवसच्चलतीवेत्यर्थः किंचतद्दूरेवर्षकोटिशतैरप्यविदुषामप्राप्यत्वा
द्दूरइवतद्वंतिके समीपेऽत्यंतमेवविदुषामात्मत्वान्नकेवलंदूरेऽन्तिकेचतदंतरेऽभ्यंतरेऽस्यसर्वस्य यआत्मा
सर्वांतरइतिश्रुतेः अस्यसर्वस्यजगतोनामरूपक्रियात्मकस्य तदुअपिसर्वस्यास्यबाह्यतोव्यापकत्वादाकाशवन्निरति
शयसूक्ष्मत्वादंतः प्रज्ञानघनएवेतिचशासनान्निरंतरंच ५ यस्तुसर्वाणिभूतान्यात्मन्येवानुपश्यति सर्वभूतेषुचा
त्मानंततोनविजुगुप्सते ६ यस्तुपरिव्राड्मुमुक्षुःसर्वाणिभूतान्यव्यक्तादीनिस्थावरांतान्यात्मन्येवानु
पश्यतिआत्मव्यतिरिक्तानिनपश्यतीत्यर्थः सर्वभूतेषुचतेष्वेवचात्मानंतेषामपिभूतानांस्वमात्मानमा
त्मत्वेनयथास्यदेहस्यकार्यकारणसंघातस्याऽऽत्माऽहंसर्वप्रत्ययसाक्षीभूतःचेतयिताकेवलोनिर्गुणोऽ
नेनैवस्वरूपेणाव्यक्तादीनांस्थावरांतानामहमेवात्मेतिसर्वभूतेषुचात्मानंयस्तुनिर्विशेषंपश्यतिसततत
स्तस्मादेवदर्शनान्नविजुगुप्सते विजुगुप्सांघृणांनकरोतीतिप्राप्तस्यैवानुवादोऽयंसर्वाहिघृणात्मनोऽन्यद्दुष्टंपश्यतो

ई०उ०भा०
६

यंगादित्येन इत्येतैर्मन्त्रैरुपदिष्टं तत्तत्त्वाधिकृतान् कामिन इति तथा चाश्वेताश्वतराणां मन्त्रोपनिषदि
अत्याश्रमिभ्यः परमं पवित्रं प्रोवाच सम्यगृषिसंघजुष्टमित्यादि विभज्योक्तं यत्तु कर्मिनिष्ठः क
र्म कुर्वन्नेव जिजीविषेच्छतं समाः इत्युच्यते अन्धं तमः इत्यादि कथं पुनरवगम्यते ननु सर्वेषामि
त्युच्यते अकामिनः साध्यसाधनभेदोपमर्देन यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः तत्र
को मोहः कः शोक एकत्वमनुपश्यत इति यदात्मैकत्वविज्ञानं तन्न केनचित्कर्मणा ज्ञानान्तरेण
वा ह्यमूढः समुच्चिचीषति इह त्वसमुच्चिचीषया अविद्वत्त्वे शक्यते तत्र यस्य येन समुच्च
यः संभवति न्यायतः शास्त्रतो वा तदिहोच्यते यद्दैवं वित्तं देवताविषयज्ञानं कर्मसंबंधित्वेनो
पन्यस्तं न परमात्मज्ञानं विद्यया देवलोक इति पृथक्फलश्रवणात् तयोर्ज्ञानकर्मणोरिहै
कैकानुष्ठाननिन्दा समुच्चिचीषया न निन्दापरैवैकैकस्य पृथक्फलश्रवणात् विद्यया तदारोह
न्ति विद्यया देवलोकः न तत्र दक्षिणा यान्ति कर्मणा पितृलोक इति न हि शास्त्रविहितं किंचिदकर्त
व्यतामियात् अन्धं तमः प्रविशन्ति येऽविद्यामुपासते ततो भूय इव ते तमो य उ विद्यायां रताः ॥ ९ ॥ श्रीः

6

रिभूः स्वयंभूः स्वयमेव भवतीति सर्वेषामुपरि भवति यश्चोपरि भवति स स्वयमेव भवतीति स्वयंभूः स नि
त्यमुक्त ईश्वरो याथातथ्यतः सर्वज्ञत्वाद्यथातथाभावो याथातथ्यं यथाभूतकर्मफलसाधनतः अर्थान्क
र्त्तव्यपदार्थान् व्यदधात् विहितवान् यथानुरूपं व्यभजदित्यर्थः शाश्वतीभ्यो नित्याभ्यः समाभ्यः संवत्सरा
ख्येभ्यः प्रजापतिभ्य इत्यर्थः अत्राद्येन मंत्रेण सर्वेषणापरित्यागेन ज्ञाननिष्ठोक्ता प्रथमो वेदार्थः
ईशावास्यमिदं सर्वं मा गृधः कस्य स्विद्धनमिति अज्ञानां जिजीविषूणां ज्ञाननिष्ठाऽसंभवे कुर्वन्ने
वेह कर्माणि जिजीविषेदिति कर्मनिष्ठोक्ता द्वितीयो वेदार्थः अनयोश्च निष्ठयोर्विभागो मंत्रप
रिदर्शितयोर्बृहदारण्यकेपि प्रदर्शितः सोकामयत जाया मे स्यादित्यादिनाऽज्ञस्य कामिनः कर्मा था
णीति मन एवास्यात्मा वाग्जाये त्यादिवचनात् अज्ञत्वं कामित्वं च निश्चितमवगम्यते तेन तत्फलं
सप्तान्नसर्गस्तेष्वात्मभावेनात्मस्वरूपावस्थानं जायाद्येषणात्रयसंन्यासेन चात्मविदां कर्मनि
ष्ठाप्रातिकूल्येनात्मस्वरूपनिष्ठैव दर्शिता किं प्रजया करिष्यामो येषां नोयमात्माऽयं लोक इत्यादि लो
ना ये तु ज्ञाननिष्ठाः संन्यासिनस्तेभ्योऽसूर्या नामेत्यादिनाऽविद्वन्निंदाद्वारेणात्मनो याथात्म्यं स प

उ० भा०
७

येऽसंभूतिमुपासते ततो भूय इव ते तमो य उ संभूत्यां रताः १२ अधुना व्याकृताव्याकृतोपासनयोः समुच्चि-
चीषया प्रत्येकं निन्दोच्यते अन्धं तमः प्रविशन्ति येऽसंभूतिं संभवनं संभूतिः सा यस्य कार्यस्य सा संभूतिस्तस्या
अन्या असंभूतिः प्रकृतिः कारणमविद्याख्याव्याकृताख्या तामसंभूतिमव्याकृताख्यां प्रकृतिं कारणं अ-
विद्याकामकर्मबीजभूतामदर्शनात्मिकामुपासते ये ते तदनुरूपमेवान्धं तमोऽदर्शनात्मकं प्रविशन्ति ततस्त-
स्मादपि भूयो बहुतरमिव तमः प्रविशन्ति य उ संभूत्यां कार्यब्रह्मणि हिरण्यगर्भाख्ये रताः १२ [redacted]
[redacted] १२ अधुनोभयोरुपासनयोः समुच्चयका-
रणमवयवफलभेदमाह अन्यदेवाहुः फलं संभवात्संभूतेः कार्यब्रह्मोपासनादणिमाद्यैश्व-
र्यलक्षणं व्याख्यातवन्त इत्यर्थः तथा चान्यदाहुरसंभवादसंभूतेरव्याकृतादव्याकृतोपासनाद्यदुक्तम-
न्धं तमः प्रविशन्तीति प्रकृतिलय इत्यपि च पौराणिकैरुच्यते इत्येवं शुश्रुम धीराणां वचनं ये नस्तद्वि-
चचक्षिरे व्याकृताव्याकृतोपासनफलं व्याख्यातवन्त इत्यर्थः १३ संभूतिं च विनाशं च यस्तद्वेदोभयं
सह विनाशेन मृत्युं तीर्त्वा संभूत्यामृतमश्नुते १४ यत एवमतः समुच्चयः संभूत्यसंभूत्युपासनयोर्युक्त एवै-
कपुरुषार्थत्वाच्चेत्याह संभूतिं च विनाशं च यस्तद्वेदोभयं सह विनाशेन विनाशो धर्मो यस्य कार्यस्य
तेन धर्मिणाभेदेनोच्यते विनाशेनेति तेन तदुपासनेनानैश्वर्यमधर्मकामादिदोषजातं च मृत्युं श्रीरा

अंधं अदर्शनात्मकं तमः प्रविशंति ये के अविद्यां विद्याया अन्यां अविद्यां कर्मेत्यर्थः तामविद्यामग्निहो
त्रादिलक्षणामेव केवलामुपासते तत्पराः संतोऽनुतिष्ठंतीत्यभिप्रायः ततस्तस्मादंधात्मकात्तमसो
भूय इव बहुतरमेव ते तमः प्रविशंति के कर्म हित्वा ये तु विद्यायामेव देवताज्ञाने रता अभिरता नन्वा
वांतरफलभेदं विद्याकर्मणोः समुच्चयकारणमाह यथा फलवत् फलवतोः संनिहितयोरंगांगिन
र्भ्यादित्यर्थः ९ अन्यदेवाहुर्विद्यया अन्यदाहुरविद्यया इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे १० अ
न्यदेवेत्यादि अन्यत् पृथगेव विद्यया क्रियते फलमित्याहुः वदंति विद्यया देवलोकः विद्यया तदारोहंतीति
श्रुतेः अन्यदाहुरविद्यया कर्मणा क्रियते तथा च कर्मणा पितृलोक इति श्रुतेः इत्येवं शुश्रुम श्रुत
वंतो वयं धीराणां धीमतां वचनं ये आचार्याः नोऽस्मभ्यं तत् कर्म ज्ञानं च विचचक्षिरे व्याख्यातवंतस्ते
षामयमागमः पारंपर्यागत इत्यर्थः १० विद्यां चाविद्यां च यस्तद्वेदोभयं सह अविद्यया मृत्युं तीर्त्वा वि
द्ययामृतमश्नुते ११ यत एवमतः विद्यां चाविद्यां च देवताज्ञानं कर्म चेत्यर्थः यस्तद्वेदोभयं सह एकेन पु
रुषेणानुष्ठेयं वेद तस्यैव समुच्चयकारिण एवैकपुरुषार्थसंबंधः क्रमेण स्यादित्युच्यते अविद्यया कर्म
णाग्निहोत्रादिना मृत्युं स्वाभाविकं कर्म ज्ञानं च मृत्युशब्दवाच्यमुभयं तीर्त्वातिक्रम्य विद्यया देवता
ज्ञानेनामृतं देवतात्मभावमश्नुते प्राप्नोति तद्ध्यमृतमुच्यते यद्देवतात्मगमनं ११ अंधं तमः प्रविशंति

ई०उ०भा० हिरण्मयमिवज्योतिर्मयमिवत्येतत्तेनपात्रेणापिधानभूतेनतस्यैवाऽऽदित्यमंडलस्थस्यब्रह्मणो
२ ऽपिहितमाच्छादितंमुखंद्वारंतत्त्वंहेपूषन्नपावृणुऽपसारयसत्यधर्म्मायतवसत्यस्योपासनात्स
त्यंसत्यंधर्मोयस्यममसोऽहंसत्यधर्म्मातस्मैमह्यमथवायथाभूतस्यधर्म्मस्यानुष्ठात्रेदृष्टयेतवस
त्याऽऽत्मनःउपलब्धये १५ पूषन्नेकर्षेयमसूर्य्यप्राजापत्यव्यूहरश्मीन्त्समूहतेजोयत्तेरूपंकल्याणतमं
तत्तेपश्यामियोसावादित्येपुरुषःसोऽहमस्मि १६ हेपूषन्जगतःपोषणात्पूषारविस्तथैकएवऋषति
गच्छतीत्येकर्षिर्हेएकर्षेतथासर्वस्यसंयमनाद्यमोहेयमतथारश्मीनांरसानांप्राणानांसर्वस्वीक
रणात्सूर्य्यःहेसूर्य्यप्रजापतेरपत्यंप्राजापत्यःहेप्राजापत्यव्यूहविगमयरश्मीन्त्समूहएकीकुरुउपसंहरते
जोयत्तापकंज्योतिर्वर्त्ततेयत्तेतवरूपंकल्याणतमंअत्यंतशोभनंतेनतेतवात्मनःप्रसादात्पश्या
मिकिंचाहंत्वांनतुभृत्यवद्याचेयमसावादित्यमंडलस्थोव्याहृत्यवयवःपुरुषःपुरुषाकारत्वात्
पूर्णोवाऽनेनप्राणबुद्ध्यात्मनाजगत्समस्तमितिपुरुषःपुरिशयनाद्वासोऽहमस्मिभवामि १६ वायुर
निलममृतमथेदंभस्मान्तंशरीरंॐक्रतोस्मरकृतंस्मरक्रतोस्मरकृतंस्मर १७ अथेदानीं
ममम्रियमाणस्यवायुःप्राणोऽध्यात्मपरिच्छेदंहित्वाऽधिदैवतात्मानंसर्वात्मकमनिलममृतंसूत्रात्मा
नंप्रतिपद्यतामितिवाक्यशेषःलिंगंचेदंज्ञानकर्मसंस्कृतमुत्क्रामत्वितिद्रष्टव्यंमार्गयाचनसाम श्रीरा

तीर्त्वा हिरण्यगर्भोपासनेन ह्यणिमादिप्राप्तिः फलं तेनानैश्वर्यादि मृत्युमतीत्य असंभूत्या अव्या
कृतोपासनेनामृतं प्रकृतिलयलक्षणमश्नुते संभूतिं च विनाशं चेत्यत्र अवर्णलोपेन निर्देशो
द्रष्टव्यः प्रकृतिलयफलमश्नुत इति श्रुत्यनुरोधात् मानुषदैववित्तसाध्यं फलं शास्त्रलक्षणं प्र
कृतिलयान्तमेतावती संसारगतिः अतः परं पूर्वोक्तमात्मैवाभूद्विजानत इति सर्वात्मभाव एव स
र्वैषणासंन्यासज्ञाननिष्ठाफलं एवं द्विप्रकारः प्रवृत्तिनिवृत्तिलक्षणो वेदार्थोऽत्र प्रकाशितः॥१४
हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखं तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये १५ तत्र प्रवृत्तिल प्र
क्षणस्य वेदार्थस्य विधिप्रतिषेधलक्षणस्य कृत्स्नस्य प्रकाशने प्रवर्ग्यान्तं ब्राह्मणमुप
युक्तं निवृत्तिलक्षणस्य वेदार्थस्य प्रकाशनेऽत ऊर्ध्वं बृहदारण्यकं तत्र निषेकादिश्मशानान्तं क
र्म कुर्वन् जिजीविषेद्यो विद्यया सहापरब्रह्मविषयया विद्यां चाविद्यां च यस्तद्वेदोभयं सह इत्यत्र विद्यया
मृतमश्नुत इत्युक्तं तत्र केन मार्गेणामृतत्वमश्नुत इत्युच्यते तद्यत्तत्स
त्यमसौ स आदित्यो य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन्पुरुष एतदुभयं सत्यं ब्रह्मोपासी
नो यथोक्तकर्मकृच्च यः सोऽन्तकाले प्राप्ते सत्यात्मानमात्मनः प्राप्तिद्वारं याचते हिरण्मयेन पात्रेण

०भा० समुच्यते विद्याशब्देन मुख्या परमात्मविद्यैव कस्मान्न गृह्यतेऽमृतत्वं च ननूक्तं परमात्मविद्यायाः क
र्मणश्च विरोधात्समुच्चयानुपपत्तिरिति सत्यं विरोधस्तु नावगम्यते विरोधाविरोधयोः शास्त्रप्रमाणक
त्वात् यथाऽविद्यानुष्ठानं विद्योपासनं च शास्त्रप्रमाणकं तथा तद्विरोधाऽविरोधावपि यथा च
न हिंस्यात्सर्वा भूतानीति शास्त्रादवगतं पुनः शास्त्रेणैव बाध्यतेऽध्वरे हिंस्यादिति एवं विद्याविद्ययो
रपि स्यात् विद्याकर्मणोश्च न दूरमेते विपरीते विषूची अविद्या या च विद्येति ज्ञातेति श्रुतेः वि
द्यां चाविद्यां चेति वचनादविरोध इति चेन्न हेतुस्वरूपफलविरोधात् विद्याविद्याविरोधाविरोधयो
र्विकल्पासंभवात्समुच्चयविधानादविरोध एवेति चेन्न सहसंभवानुपपत्तेः क्रमेणैकाश्रये
९ स्यातां विद्याविद्ये इति चेन्न विद्योत्पत्तौ अविद्याया ह्यस्तत्वात्तदाश्रयेऽविद्यानुपपत्तेः नह्यग्नि
रुष्णः प्रकाशश्चेति विज्ञानोत्पत्तौ यस्मिन्नाश्रये तदुत्पन्नं तस्मिन्नेवाश्रये शीतोऽग्निरप्रकाशो
वेत्यविद्योत्पत्तिर्नापि संशयोऽज्ञानं वा यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः तत्र को मोहः
कः शोक एकत्वमनुपश्यत इति शोकमोहाद्यसंभवश्रुतेः अविद्यासंभवात्तदुपादानस्य कर्मणो
प्यनुपपत्तिमवोचाम अमृतमश्नुत इत्यापेक्षिकममृतं विद्याशब्देन परमात्मविद्याग्रहणे हि
रण्मयेत्यादिना द्वारमार्गयाचनमनुपपन्नं स्यात् तस्मादुपासनया समुच्चयः न परमात्मविज्ञा

ष्यात् अथेदं शरीरमग्नौ हुतं भस्मान्तं भूयात् ॐ मिति यथोपासनं ॐ प्रतीकात्मकत्वात् सत्यात्मकमग्न्याख्यं ब्र
ह्माभेदेनोच्यते हे क्रतो संकल्पात्मक स्मर यन्मम स्मर्त्तव्यं तस्य कालोऽयं प्रत्युपस्थितः अतः स्मर एतावं
तं कालं भावितं कृतं अग्ने स्मर यत् मया बाल्यप्रभृत्यनुष्ठितं कर्म तच्च स्मर क्रतो स्मर कृत
ं स्मरेति पुनर्वचनमादरार्थं १७ अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान् युयोध्य
स्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम १८ इति सोपनिषत्स मंत्रा ० पुनरन्येन मंत्रेण
मार्गं याचते हे अग्ने नय गमय सुपथा शोभनेन मार्गेण सुपथेति विशेषणं दक्षिणमार्गनिवृत्त्यर्थं
निर्विण्णोहं दक्षिणेन मार्गेण गतागतलक्षणेनातो याचे त्वां पुनः पुनर्गमनागमनवर्जितेन शोभने
न पथा नय राये धनाय कर्मफलभोगायेत्यर्थः अस्मान्यथोक्तधर्मफलविशिष्टान् विश्वानि सर्वाणि
हे देव वयुनानि कर्माणि प्रज्ञानानि वा विद्वान् जानन् किंच युयोधि वियोजय विनाशय अस्मदस्मत्तो जुहु
राणं कुटिलं वंचनात्मकमेनः पापं ततो वयं विशुद्धाः सन्त इष्टं प्राप्स्याम इत्यभिप्रायः किंतु वयमिदानीं
ते न शक्नुमः परिचर्यां कर्तुं भूयिष्ठां बहुतरां ते तुभ्यं नम उक्तिं नमस्कारवचनं विधेम नमस्कारेण परि
चरेमेत्यर्थः अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते विनाशेन मृत्युं तीर्त्वा संभूत्यामृतमश्नुते इति श्रु
त्वा केचित्संशयं कुर्वन्ति अतस्तन्निराकरणार्थं संक्षेपतो विचारणां करिष्यामः तत्र तावत्किंनिमित्तः संशय

याव्याख्यातं एवं मन्त्राणामर्थ इत्युपरम्यते ॥१८॥ इति श्रीमत्परमहंसपरिव्राजकाचार्य
विन्दभगवत्पूज्यपादशिष्यस्य श्रीशंकराचार्यस्य कृतमीशावास्यभाष्यं संपूर्णं ॥०॥ श्री
शाय नमः ॥ अथ केनो[illegible] प्रारम्भः ॥ कर्म्मात्मनस्तत्त्वगोचरविषयं विज्ञानं कर्म्मचोदनं
पर्यावर्धिकस्य संस्कारानु[illegible]न् विविधोत्तरारम्भांस्तन्तोभ्यः [illegible] भवन्तः यत
ते येन स्वात्मकर्म्मसमुच्चयं [illegible] नामन्यत्समस्तं संस्कारस्योच्छिन्नात्मसंस्थानं भविष्यत्
विषयपदोपदर्शिनी [illegible] विषयत्वात्संसारबीजमज्ञानमुच्छिद्य [illegible] यतः
विषयजिज्ञासोः केनेषितमित्याद्युपनिषदात्मविज्ञानाय आरभ्यते तेन

10